# VIHAAN

## 2022

ANNUAL MAGAZINE




Bharati College, NCWEB, University of Delhi

# Index

Director NCWEB Message..............................1
Principal Bharati College Message.................2

Teacher-In Charge Message............................3
Annual Report..................................................4

Photo Gallery I..................................................6

Sanskrit Section...............................................16

Hindi Section....................................................36

Photo Gallery II.............................................. 43
English Section.............................................. ..55



*"Language is the vehicle of ideas"*

- *Swami Vivekananda*

Words are at play in the hands of a writer who can weave a dream, an inspiration, fantasy, horror, love stories and an array of emotions mankind emulates. NCWEB Centre, Bharati College is all set to give a stage to its talented student writers, poets, story tellers to come out with one more edition of their magazine "Vihaan 2022".

I am hopeful that as the name of the magazine suggests; it will bring a new dawn in the expressions and writings the students of this NCWEB centre and they will take this opportunity to showcase their talent. As we celebrate 75 years of our freedom from colonial rule under the theme of 'Azadi Ka Amrut Mahotsav', this e-magazine will be a collective representation of the creativity of the students on the various aspects of our freedom struggle. I have been told that the articles in the magazine are in English, Hindi and Sanskrit languages, I'm delighted to know that the contribution in Sanskrit language has surpassed both Hindi and English. I congratulate the Teacher in Charge, Dr. Mala Rani and the faculty members of the Centre for their sincere efforts and the non-teaching staff for logistic support, towards the publication of this magazine.

Prof. Dr. Geeta Bhatt

Director, NCWEB, University of Delhi



I'm proud to say that Bharati College NCWEB grooms its young women to be disciplined, skilled, articulate and proactive in taking initiatives to hold their own place in the world. They are encouraged to be socially responsible and play active role as responsible citizens of the Country. This all empowers the young women to increase their control over the decisions that affect their lives both within and outside the household. Through their empowerment young women gain greater share of control over resources and it gives them the power of decision making in the home, community, society and nation. Acquiring information and knowledge along with the skills to build the powers of human mind and spirit are the true objectives of education NCWEB at Bharati strives for imparting these to its women learners.

Along with academic pursuits, the students are encouraged to associate with the grassroots to widen their skills and abilities. Special efforts are made to encourage the learner's to participate in various cultural activities. There is a constant endeavour to provide an environment of mutual respect at the centre, in pursuit of a shared ambition. Ours is a caring community where students' needs are a priority and traditional Indian and modern Western educational values are respected and encouraged to coexist.

We at Bharati NCWEB centre try to provide a sincere, compassionate, inspiring and stimulating environment in which our students learn and progress. The success of an educational institution is underpinned by its ability to nurture talent and give opportunities to realise their potential. Our prime purpose is to provide an education which explores and strengthens the potential which is innate in every individual but awaiting expression.

I congratulate Dr. Mala Rani, Teacher-in-Charge and her entire team who have ensured a vibrant and engaged student community where there is a healthy blend of traditional values along with a progressive outlook.

Prof. Rekha Sapra
Officiating Principal
Bharati College



*"To be good and to do good - that is the whole of education."*

***Swami Vivekananda***

It gives me immense pleasure to place before you the latest edition of our magazine- *'Vihaan 2022'*.

Life today is inundated with the printed words, mostly not on paper, some trivial, some valuable, but most transient. Fortunately, there emerges, occasionally, a peak of commitment and concern. *Vihaan 2022* is one such attempt to inform, reveal and showcase the creativity of our students and faculty in a unique way.

To impart an education that is holistic and extends from the classroom to our students' life, *Vihaan 2022* is a medium. We endeavour to transform gauche, meek and impressionable girls who throng our corridors as *freshers* into smart and attractive personalities with intellect and values.

We teachers nurture young minds and souls and then, having done our job, sit back and quietly let them go. I compliment the editor, Dr. Anjali Singh and her entire team of editors for bringing out this attractive and superb edition of *Vihaan* with the most suitable theme, *Azadi Ka Amrit Mahotsav* in the 75$^{th}$ year of our Independence.

Dr. Mala Rani
Teacher-in-Charge
Bharati College,
NCWEB, University of Delhi

# Annual Report 2021-22

The academic session 2021-22 held special importance for all good reasons. It was a feeling of witnessing a phoenix, the mythical bird which is reborn from its own ashes, after experiencing once in hundred years Pandemic. Faculty and students entered the campus after a gap of two years. The excitement could be palpable throughout the session. Though admission process for academic year began in October 2021, online classes for odd semester started from 30 Dec 2021. These semesters ended in Feb 2022 followed by OBE exam in March 2022.

The odd semesters started offline in April 2022. Since students were attending college after two years, it was needless to say that they were aspiring for more than just syllabus and exams. Their wishes were truly rewarded. You all will be happy to know that several co-curricular activities were conducted during the short span of time of this fast forward year, dates for various extra-curricular events and competitions were announced commencing from 29 May and scheduled for each Sunday, culminating on **24 July 2022 i.e. Annual Day.**

The following competitions were held and three winners from each were chosen; Solo Singing, Painting, Poetry, Mehendi, Best out of Waste, Solo Dance, Fireless Cooking, Debate, Quiz & Rangoli. Apart from these, **Sports day was celebrated on 9 July 2022.** Students and faculty members participated with enthusiasm. The events held include Sack Race, 100m Race, Lemon Race, Yoga Competition, Skipping & 100m Race of staff members.

The enthusiastic participation of our students is a testimony of success of these events. I firmly believe in the holistic development of my girls, and the fact that many valuable lessons of life are learned on the games field, during dramatics, hobbies and outdoor trips which we could not organize due to first COVID and then extremely hot weather, but are still in our bucket list. Education, minus character development and leadership is of no value. While we are proud of Delhi University's 100 year old heritage and traditions, we are at the same time keen to be as modern as possible in order to be relevant to this age and times, and be ready for the future.

During *Azadi ka Amrit Mahotsava,* Our students also participated in Online Competitions, **"One Week for Nation"**, organized by NCWEB from 15 August to 22 August 2021. I'm delighted to announce that our second year students, Nancy Patel won the first prize in Poster Making Competition and Princy Verma won third prize in Best out of Plastic Waste Competition. I think both of them surely deserve a big hand. Our students and faculty members also participated in **International Women Day organized by NCWEB, DU North Campus** on 14 March 2022.

Other curricular and co-curricular events organized during this packed academic session were **a Webinar on "What after Graduation"** on 21 Feb 2022, **E- Accountant Course: Seminar** ***Skill Hai to Job Hai*** in association with Sardar Patel Academy and Research Centre on 10 April 2022, **Seminar on Save Soil** on 29 May 2022 in association with Isha Foundation, **Russian-Ukraine War and International Relations Presentation** held on 26 June 2022 organized by teacher teaching Semester IV Political Science students Mr. Stanzin Lhaskyab, **CFX Chartered Financial Expert: A live orientation session** held on 26 June 2022 in collaboration with FinX. **Van Mahotsav Celebration** Program was held on 2 July 2022. EVS faculty member, Mr. Chandranshu Tiwari organized a Documentary session for students to create awareness about environment. **Cyber Safety Awareness Programme** was held on 3 July 2022 courtesy NCWEB, University of Delhi. Students were informed about dangers, threats of online activities, and important websites/ helpline where they can reach out for help. The resource persons were Delhi Police Official from cyber-crime branch.

I conclude this report by expressing my sincere gratitude to the Chairman, Director and other administrative staff of NCWEB, the Principal, Bharati College, the teaching and non-teaching staff of our Center and students for their dedication and sincere efforts which keep us motivated on the path to realizing vision of Non-Collegiate Women's Education Board, University of Delhi, and enables us to scale new heights. I also expect that our passing out students will remain in touch with us as alumni of Bharati College, NCWEB.

Dr. Mala Rani
Teacher-in-Charge
Bharati College Center

Annual Day NCWEB Bharati College Center

On Sunday 24th July, 2022 NCWEB Bharati College Centre celebrated its Annual Day. The program was organized in the college ground. NCWEB Director Dr. Geeta Bhatt Chairman Mr. Dayanath Jha and NCWEB Deputy Director Mr. Surendra Kumar grace the occasion with their presence. The distinguished guests were presented with paintings made by students of Bharati college NCWEB teaching center by Teacher in charge, Dr. Mala Rani.

The program started with a welcome address and a lamp-lightening ceremony. It was followed by Saraswati Vandana. Dr. Mala Rani presented the Annual Report. It was followed by prize distribution ceremony. Trophies and certificates were given to academic winners, cultural event and sport's day winners. The prize distribution ceremony was followed by the release of Bharati College NCWEB teaching Center's Magazine Vihaan 2022.

Annual day celebration also witnessed folk dances, poetry reading, and songs presentations from students showcasing their talent and versatility. Miss Bharati 2022 contest was also organized on the same day.

Director NCWEB Dr. Geeta Bhatt, addressed the students and faculty members. Her inspiring words as always lifted the spirits of students and faculty alike. The day ended with a short thanksgiving speech by TIC Dr. Mala Rani.




**Left to Right: Dr. Kamini Bhutani ( Deputy Coordinator),**

**Dr. Rekha Sapra ( Principal), Dr. Mala Rani (Teacher In charge)**



## Editorial Team – Vihaan'22

L to R : Dr. Mani Shankar, Mr. Ram Prakash D, Mr. Stanzin, Dr. Leena, Mr. Niyas, Dr. Anjali, Mr. Chandranshu, Ms.Christina, Dr. Chitra, Ms. Swati, Dr. Nivedita, Ms. Shivani

# TEACHING STAFF 2022







**NON- TEACHING STAFF - 2022**

**L to R: Mr. Devanand, Mr. Jitender, Ms. Kiran, Ms. Bharati, Mr. Rajesh, Mr. Prashant, Dr. Kamini, Dr. Malarani, mr. Shailendra, Mr. Kailash, Mr. Ram Awadh, Mr. Sajjan, Mr. Sanjay, Mr. Subhash**

# BA PROGRAM I YEAR 2022












**BA PROGRAM II YEAR 2022**



**BA Program III YEAR 2022**



**B. Com I Year 2022**





**B.Com II Year 2022**




**B.Com III Year 2022**

## "Miss Bharati 2022" Event Report

Bharati College NCWEB Teaching Center, DU organised "Miss Bharati 2022" event on 24$^{th}$ July 2022 for the final year students of B.A(P) and B.Com(P). Twenty-four participation entries were received from the students. Participants displayed their various talents in the four rounds of the event.

In the first round all the participants introduced themselves following a ramp walk on the stage. The second round was an extempore competition for the shortlisted candidates from the first round. Twelve participants were again shortlisted for the third round. The third round involved a display of unique talents like dancing, singing etc. and five contestants were shortlisted. They were asked a question each by the judges in the final round of the event.

In the final round, Jolly Panthania of B.Com(P) emerged as the winner and bagged the title of "Miss Bharati 2022". Anishka Gulati and Simran from B.Com(P) became the runners-up. The crowning tiara and the titles were presented to wineers by Dr. Kamini Bhutani (Dy. Coordinator). The event was coordinated by Dr Kanishka Sethi, Ms Swati Sharma, Dr. Swati Soam, Dr. Nivedita and Ms Ritika Tehelramani.

# विहान

## (2022)

# संस्कृत-खण्डः

# विषयानुक्रमणिका


- सम्पादकीयम् ……………………………….…………….……………..…….……..18
- सुभाषितानि…………………….…………………………………….…………..….19
- स्वातन्त्र्यवीरः भगतसिंहः भावना ……………….21
- भारतीया नारी रचना………………….22
- वीराङ्गना 'कण्णहि : 'एका धर्मपरायणा नारी वैष्णवी गौरः……………23
- कोरोणादशकम् सुरुचिः कुमारी...............25
- स्वातन्त्र्यामृतम् डॉ. मणिशंकरद्विवेदी…….28
- भारतराष्ट्रविकासे संस्कृतम् डॉ.लक्ष्मीकान्तविमलः …..29
- वैदिकसाहित्ये स्त्रीणां स्वरूपम् डॉ.लीनाचौहानः ……….33

# सम्पादकीयम्

हर्षस्य विषयोऽयं यत् दिल्ली विश्वविद्यालयस्य 'नॉन कॉलेजिएट महिला शिक्षा बोर्ड' इत्यनेन भारतीमहाविद्यालयकेन्द्रेण **'विहान'** नाम्ना एका अन्तर्जालीया ई-पत्रिका प्रत्येकम् अपि वर्षे प्रकाश्यते। तस्याः ई-पत्रिकायाः २०२१-२२ शैक्षणिकवर्षस्य नूतनोऽयं अङ्कः इदानीं प्रकाश्यते। अस्यां पत्रिकायां महाविद्यालयीयानां छात्राणाम्, अध्यापकानां च आलेखेन सह महाविद्यालयेन समायोजितानां विविधानां शैक्षणिककार्यकलापानामपि विवरणं सम्यक्तया प्रदर्श्यते। पत्रिकेयं त्रिषु भाषासु उपनिबद्धा । अस्यां पत्रिकायां संस्कृत-हिन्दी-अंग्रेजी-भाषायां लिखितानां छात्राणामथ च अध्यापकानां मौलिकाः पद्यरचनाः आलेखाश्च विद्यन्तेतराम्।

**'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा'** इत्युक्त्या समग्रेऽपि संसारे भारतीयाः संस्कृतिः संस्कृतं च भारतराष्ट्रस्य गौरवं वर्धयन्तः। भारतीयसंस्कृतौ नारीणाम् अत्यन्तं गौरवास्पदं स्थानं स्वीकृतं वर्तते। वयं भारतीयाः सकलां भूमिमेव मातृरूपेण कल्पिताः स्मः। यथोक्तम् अथर्ववेदे **'माता भूमिः पुत्रोऽहं पृथिव्याः।'** मनुस्मृतौ अपि नारीणां सम्माने उल्लिखितं वर्तते यत् **'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः'** इति। यदि समाजे एका स्त्री शिक्षिता भवति तर्हि समाजस्य एकः समग्रः कुटुम्बःशिक्षितो भवति। यतोहि परिवारे माता एव स्वसन्तानेभ्यः आदिगुरुः भवति। एतस्मात् कारणात् समाजे स्त्रीणां कृते शिक्षा अनिवार्या अस्ति। दिल्लीविश्वविद्यालयस्य 'नॉन कॉलेजिएट वुमेन एजुकेशन बोर्ड' इति प्रकल्पोऽयं नारीशिक्षाकृते अग्रणीभूमिकायाः निर्वहणं कुर्वन् अस्ति। अस्य संस्थानस्य दिल्लीनगर्यां स्थितेषु महाविद्यालयीयेषु विविधेषु केन्द्रेषु उच्चशिक्षां प्राप्तुकामाः नैकाः बालिकाः स्नातकं स्नातकोत्तरं च उपाधिं प्राप्नुवन्ति। प्रकल्पस्यास्य इयं विशेषता अस्ति यत् अस्य विविधानि केन्द्राणि प्रायः अवकाशदिवसे एव समायोज्यन्ते। अतः याः बालिकाः क्वचित् कार्यरताः सन्ति ताः अपि स्वकीयां कक्षां कर्तुं शक्नुवन्ति।

इयम् ई-पत्रिका महाविद्यालयीनां छात्राणां नवोन्मेषस्य प्रदर्शनार्थम् एकं महत्त्वपूर्णं माध्यमं वर्तते। 'स्वतन्त्रतायाः अमृतमहोत्सवम्' इति विषयं केन्द्रे निधाय अस्याः पत्रिकायाः संस्कृतखण्डे आदौ कैश्चित् संस्कृतसुभाषितैः सह छात्राणाम्,अध्यापकानां च लिखितानि पद्यानि आलेखानि च समाहितानि सन्ति।

मन्यामहे, पत्रिकायाः अङ्कोऽयं आगामि-अङ्कस्य संस्कृतरचनाकर्तृणां कृते अवश्यमेव सत्प्रेरको भविष्यति। अस्याम् ई-पत्रिकायाम् आलेखप्रदानकर्त्रीः आलेखप्रदानकर्तॄंश्च प्रति सादरम् आभारं प्राकट्य महाविद्यालयीयकेन्द्रस्य अध्यापक-कार्यप्रभारी-महोदयाः प्रति, केन्द्रस्य समायोजकमहोदयाः प्रति, समेषां सहायकाध्यापकवृन्दान् प्रति यथायोग्यम् अभिवादनं कार्तज्ञ्यञ्च ज्ञाप्यते।

**यथा सूर्येण चन्द्रेण संसारोऽयं प्रकाशितः।**

**'विहान'स्यास्य अङ्केन छात्रवृन्दाः प्रकाशिताः॥**

**डॉ.मणिशंकरद्विवेदी** | **डॉ.लीना चौहानः**

# सुभाषितानि

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।**
**देवा भागं यथा पूर्वे सञ्जानाना उपासते ।।**

हम सब एक साथ चलें, एक साथ बोलें, हम सबका मन एक हो। प्रा◌ाचीन समय में देवताओं का ऐसा आचरण रहा, इसी कारण वे वन्दनीय हैं।

**सहनाववतु। सह नौ भुनक्तु। सहवीर्यं करावहै।**

**तेजस्विनावधीतमस्तु। मा विद्विषावहै॥**

परमात्मा हम (आचार्य और शिष्य) दोनों की साथ-साथ रक्षा करें। हम दोनों का साथ-साथ पालन करें। हम साथ-साथ विद्यासम्बन्धी सामर्थ्य प्राप्त करें। हम दोनों का अध्ययन तेजस्वी हो। हम किसी से द्वेष न करें।

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैवकुटम्बकम्।।**

यह मेरा है, यह उसका है, इस प्रकार के विचार वे लोग करते हैं जिनकी बुद्धि संकीर्ण होती है। व्यापक विचारों वाले लोगों की दृष्टि में तो समस्त संसार ही एक परिवार है।

**वृत्तं यत्नेन संरक्षेद् वित्तमायाति याति च ।**
**अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ।।**

मनुष्य को अपने चरित्र का संरक्षण प्रयत्नपूर्वक करना चाहिये (धनका नही), क्योंकि धन तो आते जाते रहता है। धन के नष्ट हो जाने पर उसे पुनः प्राप्त किया जा सकता है परन्तु शीलहीन मनुष्य मृत के समान होता है।

**न चौर्यहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।**
**व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम।।**

विद्या रूपी धन को न चोर चुरा सकता है, न राजा ले सकता है, न भाई बांट सकता है, न ही वह किसी के कंधे पर वह बोझ ही होता है। उसको खर्च करने पर वह हमेशा बढ़ता ही है। इसलिए विद्यारूपी धन को सभी धनों में प्रमुख बतलाया गया है।

**सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।**
**वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः।।**

बिना विचार किये अचानक से कोई भी कार्य नहीं करना चाहिए; क्योंकि बिना सोचे समझे किया गया कार्य आपत्ति का कारण बन जाता है। जो धन गुणों पर मुग्ध होता है, वह सोच-समझकर काम करने वाले को ही माला पहनाता है।

**अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम्।**
**सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः।।**

अनेक शंकाओं को दूर करने वाले, भूत-भविष्य और परोक्ष को प्रत्यक्ष दिखाने वाले शास्त्ररूपी नेत्र जिसके पास नहीं है, वह वास्तव में अंधा है।

**पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।**

**सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः॥**

पुरानी होने मात्र से ही न तो सभी वस्तुएँ अच्छी होती हैं और न नयी होने से बुरी तथा हेय। विवेकशील व्यक्ति अपनी बुद्धि से परीक्षा करके श्रेष्ठतम वस्तु को अंगीकार कर लेते हैं और मूर्ख लोग दूसरों के द्वारा बताने पर ग्राह्य अथवा अग्राह्य का निर्णय करते हैं।

**पुस्तकस्थातु या विद्या परहस्तगतं धनम्।**

**कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥**

पुस्तक में रहने वाली विद्या (मात्र पुस्तकीय ज्ञान) अर्थात् बिना समझ के पढ़ी हुयी विद्या तथा दूसरों के हाथ में गया हुआ अपना ही धन, आवश्यकता पड़ने पर न तो वह विद्या न ही वह धन ही काम में नहीं आते हैं।

**गुरुशुश्रूषया विद्या पुष्कलेन धनेन वा।**

**अथ वा विद्यया विद्या तुरीयं नास्ति साधनम्॥**

विद्या (ज्ञान) प्राप्ति के तीन ही रास्ते हैं- पहला गुरु की सेवा सुश्रुषा द्वारा गुरु कृपा से विद्या की प्राप्ति, दूसरा प्रभूत मात्रा में किसी को धन देकर उससे विद्यार्जन करना तथा तीसरा रास्ता कुछ ज्ञान होने पर स्वयं से ग्रन्थों का अध्ययन करके अर्थात् विद्या से ही विद्या की प्राप्ति का है। इन तीनों मार्गों के अतिरिक्त विद्या प्राप्ति का कोई चौथा मार्ग नहीं है।

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**

**सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुखभाग्भवेत्॥**

सभी लोग सुखी हों, सभी लोग स्वस्थ रहें, सभी लोग कल्याणकारी दृश्य देखें, संसार का कोई भी प्राणी दुःखी न हो।

# स्वातन्त्र्यवीरः भगतसिंहः



**भावना**
स्नातक-द्वितीयवर्षम्, चतुर्थसत्रम्

किं भवन्तः कल्पयितुं शक्नुवन्ति यत् ये आङ्गलशासकाः जगतः विशालं भूभागं शासितवन्तः, येषां शासनकाले सूर्यः कदापि अस्ताचलं न गच्छति स्म, तादृशाः शक्तिशालिनः आङ्ग्लशासकाः अपि भारतराष्ट्रस्य त्रयोविंशति-वर्षीयेण क्रान्तिकारिणा अस्माकं स्वतन्त्रतायाः नायेकन भगतसिंहेन भयभीताः।

अस्माकं राष्ट्रस्य स्वतन्त्रतान्दोलने अनेके वीराः स्वकीयस्य राष्ट्रस्य स्वातन्त्र्यार्थं प्राणाहुतिम् अकुर्वन्। तेषु वीरेषु भगतसिंहः अन्यतमः ।तस्य नाम अद्यापि आबालवृद्धैः सर्वैरपि आदरेण स्मर्यते। तस्य चिन्तनम् अद्वितीयम् आसीत्। सः कथयति स्म् यत् क्रान्तिकारिणः तु सर्वदा आत्मोत्सर्गाय तत्पराः भवन्ति। ये मरणात् भयभीताः न भवन्ति, ते आयुषः चिन्तां किमर्थं कुर्युः। सः स्वदेशंस्वातन्त्र्यार्थं स्वप्राणाहुतिं दत्त्वा अमरः अभवत्।

भगतसिंहः प्रायः वर्षद्वयं कारागारे व्यतीतवान्। यदा सः कारागारे आसीत् तदा स्वकीयेन लेखेन स्वक्रान्तिकारिणं विचारं देशस्य युवकानां समक्षं निरन्तरं प्रकटयति स्म। कारागारे तिष्ठन् अपि तस्य अध्ययनं निरन्तरं भवति स्म। तस्मिन् काले तेन लिखिताः आलेखाः स्वसम्बन्धिजनं प्रति प्रेषितानि विविधानि पत्राणि च अद्यापि तस्य विचाराणां दर्पणम् अस्ति। तेन स्वकीये अनेकस्मिन् आलेखे अनेकेन प्रकारेण धनपतयः शत्रुरूपेण स्वीकृताः। तेन लिखितम् अस्ति यत् सर्वहारावर्गाणां शोषकाः यदि भारतीयाः अपि भवेयुः तदा ते तस्य कृते शत्रुसमाः एव। भगतसिंहेन कारागारे एव आंग्लभाषायाम् एकं प्रसिद्धम्

आलेखं लिखितम्। तस्य आलेखस्य शीर्षकम् आसीत्-'अहं नास्तिकः किमर्थः'। भगतसिंहेन आङ्लशासकैः भारतीयानां प्रति कारागरस्य दुर्व्यवस्थां प्रति कारागारे स्वमित्रैः सह चतुष्षष्ठिदिवसपर्यन्तं भोजनबहिष्कारम् अकुर्वत्। तस्य यतीन्द्रनाथनामकेन एकेन मित्रेण तु भोजनबहिष्कारावधौ एव स्वप्राणं त्यक्तम्।

केनापि सत्यमेव उक्तम् यत् वृद्धैः कोऽपि सुधारः कर्तुं न शक्यते, यतो हि वृद्धाः तु बुद्धिमन्तः भवन्ति। परं सुधाराः तु तादृशैः नवयुवकैः परिश्रमेण, अदम्य-साहसेन, आत्मोत्सर्गेण, निष्ठया च भवन्ति यैः कदापि भयभीतः न भूयते अथ च यैः विचारान् अपेक्षया अनुभवस्य महत्त्वं प्रदीयते।

# भारतीया नारी



**रचना**
स्नातक-द्वितीयवर्षम्, चतुर्थसत्रम्

भारतीयसमाजे नारीणां महत्त्वपूर्णस्थानं विद्यते। संस्कृतसाहित्येषु वैदिककालीनानाम् ऋषिकाणां तथा च आधुनिकानां नारीणां वर्णितं स्वरूपं तासां समाजे सम्मानजनकस्थानं द्योतयति। भारतीयसमाजे नारीणां सम्मानं सर्वेषां कृते आवश्कं स्वीकृतं वर्तते। यस्मिन् देशे नारीणां सम्मानं भवति सः देशः उन्नतिम् अधिगच्छाति। यत्र तासाम् आदरः क्रियते तत्र सुखं शान्तिश्च भवति।

अस्माकं देशे तु नारीणां स्वरूपं मातृपदेन गौरवान्वितम्। शासनेन अपि महिलानाम् अधिकाराय सर्वथा प्रयत्यते। साम्प्रतिका नारी अर्थार्जनम् अपि करोति गृहकार्यम् अपि करोति। यथा नारी स्वपरिवारस्य हितं वाञ्छति तथा समाजस्य अपि विकासं कल्याणं च इच्छति। साम्प्रतिके समये सा विविधेषु क्षेत्रेषु अग्रसरा दृश्यते। अस्माकं देशे घोषा, अपाला, गार्गी, मैत्रेयी, कात्यायायनी प्रभृतयः ऋषिकाः तथा च रानी-लक्ष्मीबाई, मदर टेरेसा, सरोजिनी नायडु प्रभृतयः बह्वव्यः देशभक्ताः नार्यः अभवन् याः राष्ट्रसेवायां सर्वदा तत्पराः आसन्।

यस्मिन् गृहे नारी न भवति तद् गृहं गृहम् इव न भासते। नारी एव स्वकष्टान् विस्मृत्य सर्वेषां सुखाय अहर्निशं प्रयतते। नार्यः तु त्यागस्य प्रतिमूर्तयः भवन्ति। सामाजिकेषु कार्येषु तासां सहभागिता सर्वत्र परिलक्ष्यते। समाजे तासां अधिकारः सर्वैः स्वीकृतः वर्तते। नारीं विना नरः संसाररथं चालयितुं नैव शक्नोति। नारी एव समर्थपुरुषस्य जननी भवति। नारीं विना तु अयं समाजः अपूर्णः अशक्तः एव। अत एव मनुना कथितं वर्तते यत् यत्र नारीणां सम्मानं भवति तत्र देवतानां वासः भवति, परं यत्र तासाम् अनादरो भवति तत्र सर्वाः कार्यकलापाः अपूर्णा अफलाश्च भवन्ति। यथोक्तं मनुस्मृतौ-

**" यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।**
**यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥"**

# वीराङ्गना *'कण्णहि'* : एका धर्मपरायणा भारतीया नारी



**वैष्णवीगौरः**
स्नातकप्रथमवर्षम्,द्वितीयसत्रम्

*शिलप्पदिहारम्* तमिलसाहित्यस्य प्रथमं महाकाव्यम् अस्ति। अस्य महाकाव्यस्य प्रणेता *इळङ्गो अडिहळ्* अस्ति। महाकाव्यमिदं त्रिषु काण्डेषु विभक्तमस्ति। अस्मिन् महाकाव्ये *कण्णहि-कोवलन् इत्यनयोः* अतीव रोचका कथा वर्णितास्ति। *कण्णहि* अस्य महाकाव्यस्य नायिका अस्ति। सा अत्र एका पतिव्रता धर्मपरायणा स्त्रीरूपेण चित्रिता वर्तते। महाकाव्ये *कण्णहि* भारतीयनार्याः प्रतिनिधित्वं करोति। तस्यैव पतिव्रतधर्ममाहात्म्य-विषयिणी कथा अत्र संक्षिप्तरूपेण वर्ण्यते। तद्यथा-

प्राचीनकाले एकः धनिकः व्यापारी चोलराज्यस्य पुहारे नामके स्थाने निवसति स्म। तस्य नाम *माशातुवान्* आसीत्। तस्य *कोवलन्* नामकः एकः पुत्रः आसीत् । यः पुहारनिवासिनः एकस्य अन्यस्य व्यापरिणः *कण्णहि* नाम्ना स्त्रिया सह विवाहितः आसीत्। तयोः विवाहस्य प्रारम्भिकं दिनं तु आनन्देन सह व्यतीतम्। एकदा *कोवलन्* पुहारस्य विख्यातायाः नर्तक्याः नृत्यं द्रष्टुं गतवान्। *कोवलन्* तस्याः नर्तक्याः नृत्यं दृष्ट्वा तस्यां सौन्दर्यमुपरि मुग्धं जातम्। सः तस्यै नर्तक्यै सहस्रस्वर्णमुद्रां समर्प्य तया सह निवासं कर्तुं प्रारब्धवान्। यदा *कण्णहि* एतादृशं विवरणं श्रुतवती तदा सा स्वपतिं पुनरागमनाय बहुवारं प्रार्थितवती। किन्तु *कोवलन्* तस्याः नर्तक्याः सान्निध्यं न त्यक्तवान्। दीर्घकालं यावत् सः तया नर्तक्या सह विलासे निमग्नः सन् तासामुपरि स्वकीयस्य पार्श्वस्य सर्वाणि धनानि समर्पितवान्। यदा तस्य पार्श्वे किञ्चिदपि धनं

शेषं नासीत् तदा सः स्वकीयं त्रुटिं ज्ञात्वा तां नर्तकीं त्यक्त्वा पुनः *कण्णहि* पार्श्वे प्रत्यागतवान्। तया नर्तक्या *कोवलन्* कृते पुनः आगन्तुं प्रार्थना कृता परं कोवलन् पुनः तस्याः समीपं गन्तुं नेच्छत्। यतो हि कोवलन् स्वकीयं सर्वं धनं तस्यां नर्तक्यामुपरि समर्पितमासीत् अतः सः धनं प्राप्तुं 'मदुरै' नगरं प्रति अगच्छत्। यदा कोवलन् समीपे व्यापाराय किञ्चिदपि धनं नासीत् तदा तस्य पत्नी *कण्णहि* तां स्वकीयाः एकस्मात् पादात् रत्नपूर्णं नुपुरं दत्त्वा तत् नुपुरं विक्रीय स्वर्णमुद्राम् आनीय स्वव्यापारं आरभतुं विनिवेदितवती। *कोवलन्* तं नुपुरं विक्रेतुं नगरं प्रति गतवान्। तत्र च राजरत्नकारं नुपुरं दर्शयित्वा तं विक्रेतुम् ऐच्छत्। दैववशात् तस्य राज्यस्य *नेन्दुजेलियन्* नामकस्य राज्ञः राज्ञ्याः तत्सदृशमेव एकं नुपुरं कैश्चित् अपहृतम् आसीत्। राजरत्नाकरः *कोवलन्* नुपुरं राज्ञ्याः अपहृतं नुपुरं मत्वा नेन्दुजेलियन् राजानं प्रति निवेदितवान्। *नेन्दुजेलियन्* स्वकीयस्य न्यायस्य कृते प्रसिद्धः आसीत्। तेन केनापि सह कदापि अन्यायः न कृतः आसीत्। तेन स्वसैनिकाः आदिष्टाः यत् ते *कोवलन्* समीपे गत्वा पश्यन्तु यत् तस्य पार्श्वे यत् नुपुरं अस्ति तत् नुपुरं राज्ञ्याः अस्ति न वा। यदि तत् नुपुरं राज्ञ्याः एव अस्ति तर्हि तस्मै मृत्युदण्डं दत्त्वा तं नुपुरमानयत। सैनिकाः *कोवलन्* समीपे गत्वा तस्य पार्श्वे स्थितनुपुरं राज्ञ्याः अस्ति इति निश्चित्य तस्मै मृत्युदण्डं दत्वा तं नुपुरं राज्ञे समर्पितम्।

यदा *कण्णहि* स्वपतेः मृत्युविषयकं समाचारं श्रुतवती तर्हि सा अत्यन्ता क्रुद्धा भूत्वा राज्ञः समीपे गतवती तथा च तं राजानं भर्त्सयित्वा अवदत्- यत् राजन्! त्वं नराधमः असि, यतो हि त्वया मम पत्युः पार्श्वे स्थितस्य नुपुरविषयकस्य सत्यं न ज्ञात्वा तस्मै मृत्युदण्डं दत्तवान्। त्वं तु न्यायप्रियः राजा आसीः, परं इदानीं त्वम् अन्यायप्रियः जातः। तदा राजा *कण्णहि* प्रति अकथयत् यत् अस्माकं राज्ये चौराणां कृते मृत्युदण्डस्य व्यवस्था अस्ति। तव पतिः चौरः आसीत्, यतो हि तेन मम भार्यायाः एकं नुपुरं चोरितम् आसीत्। अतः तस्मै कृते मृत्युदण्डमुचितमेव। त्वया कथं इदं कथितुं शक्यते यत् मम पतिः *कोवलन्* चौरः नासीत्। किं तव समीपे किमपि प्रमाणम् अस्ति येन त्वया स्वपतेः निर्दोषं कर्तुं शक्यते? तदा क्रुद्धस्वरेण *कण्णहि* अवदत्-हे मूढ! तत् नुपुरं मम आसीत्। अहमेव तत् नुपुरं तस्मै विक्रेतार्थं प्रदत्तमासीत्। इत्युक्त्वा तया स्वकीयात् पादात् द्वितीयं नुपुरं राज्ञे प्रदर्शितम्। भयभीतः राजा स्वकीयां राज्ञीं द्वितीयेन नुपुरेण सह *कण्णहि* प्रस्तुतेन नुपुरेण सह मेलनं कृत्वा सम्यक्तया ज्ञातवान् यत् *कोवलन्* समीपे यत् नुपुरं प्राप्तमासीत् तत् नुपुरं कण्णहि नुपुरं आसीत् न तु तस्य राज्ञ्याः। राजा स्वकीयां त्रुटिं ज्ञात्वा *कण्णहि* पुरतः आत्महत्यां कृतवान्। एतदनन्तरमपि *कण्णहि* शान्ता न जाता। तया उक्तं यत् मया अद्यावधिपर्यन्तं *कोवलन्* अतिरिक्तं अन्यस्य पुरुषस्य विषये किञ्चिदपि कदापि न चिन्तितम्, यदि अहं एका विशुद्धा पतिव्रता स्त्री अस्मि तर्हि अस्य राज्यस्य सद्गुणिनः ब्राह्मणान्, सद्गुणवतीः स्त्रीः च त्यक्त्वा सर्वाणि नगराणि भस्मानि सञ्जातानि। इत्युक्त्वा तया स्वकीये हस्ते स्वकीयं द्वितीयं नुपुरं संधार्य तं नुपुरं भूमौ प्रक्षिप्तम्। येन सहसा उग्रः अग्निः सञ्जातः येन समग्रं मदुरैनगरं भस्मीभूतम्। यदा मदुरैनगरस्य दहनानन्तरमपि सः अग्निः शान्तः न जातः तदा *कण्णहि* शान्त्यै तत्र देवाः आगताः। स्वयं इन्द्रः आगत्य तां *कण्णहि* स्वकीयेन सह स्वर्गं आनयत्। सा राज्ञी *कण्णहि* विषयकं सर्वं रहस्यं ज्ञात्वा पवित्रशिलया तस्याः मूर्तिं निर्माय एकं मन्दिरं स्थापितम्।

अस्याः कथयाः इदमेव सारं यत् भारतीयाः पतिव्रतायाः स्त्रियाः समक्षं देवाः अपि नतमस्तकाः भवन्ति।

# ॥ कोरोणादशकम् ॥



**सुरुचिः कुमारी**
स्नातक-प्रथमवर्षम्, द्वितीयसत्रम्

विश्वस्मिन् भिन्नराष्ट्रेषु कोविडामयबाधिताः।
लक्षशोऽपि मृतिं यान्ति दृश्यमत्यन्तशोकदम्॥ १॥

भयमेवाभयं नैव औषधं नैवं किञ्चन।
भोज्यं पेयं विना मर्त्याः भूतले निपतन्ति वै॥ २॥

मुखावरणसंयुक्ताः हस्तयोः क्षालनं भृशम्।
पौनःपुन्येन कुर्वन्ति कोरोणा भीतितोः जनाः॥ ३॥

धनसैन्यसुसम्पन्नाः सर्वराष्ट्रप्रशासकाः।
अर्थयन्तेऽतिदैन्येन औषधं दीयतामिति॥ ४॥

एतस्याः विषरोगात्तु मुक्तिं कामयते नरः।

कथमस्य निरोधस्यादित्येव खलु भाषते॥५॥

उद्योगः कृषिकार्यञ्च वाणिज्यं जनसेवनम्।
सर्वमेतत् विनष्टं हा! कदा सम्यक् भविष्यति॥६॥

त्यजन्ति स्वार्थभावं च अहङ्कारमसूयताम्।
अमित्रत्वमहो दर्पं मननात् मनुजोत्तमाः॥७॥

अधुना बहवसौम्याः शुचयश्च दयालवः।
पारस्पर्येण जीवन्ति कोरोणा तत्र कारणम्॥८॥

अर्थकामौ समौ कृत्वा धर्मवर्त्मसमन्विताः।
‘इदं न मम’ भावेन वसन्ति महदद्भुतम्॥९॥

कोरोणा स्मारयत्यस्मान् पूर्वकोक्तं सुभाषितम्।
सर्वेऽपि सुखिनः सन्तु सर्वे सन्तु निरामयाः॥१०॥

# ॥ स्वातन्त्र्यामृतम् ॥



**डॉ. मणिशंकरद्विवेदी**
प्राध्यापकः, संस्कृतविभागः

यस्य देशस्य भूभागे दृश्यते राष्ट्रभावना ।
तस्योन्नतिः भवेन्नूनं समृद्धिर्हि निरन्तरम् ॥१॥

राष्ट्रिया भावना युक्ताराष्ट्रोत्थानाय तत्परा ।
राष्ट्राभिवर्धिनी बुद्धिः सर्वदा हितकारिणी ॥२॥

एतादृश्या धिया युक्ता राष्ट्रचिन्तनतत्परा ।
राष्ट्राय जीव्यमानानां कृतार्था जननी सदा ॥३॥

पृथिव्यां जीव्यमानेषु प्रवृत्तिः दृश्यते सदा ।
पारतन्त्र्यं तु स्वप्नेऽपि ते नाऽर्हन्ति कदाचन ॥४॥

पारतन्त्र्यं हि सर्वेषां दुःखानां मूलकारणम् ।
अतः स्वातन्त्र्यप्राप्त्यर्थं यत्यते देशवासिभिः ॥५॥

वयं धन्यामहे सर्वे जन्म लब्ध्वा तु भारते ।
भारतीयाभिधानेन गौरवमनुभूयते ॥६॥

उपेक्षासहिता मैत्री करुणामुदिता युता ।
सर्वलोकहिते सर्वे तत्परास्सन्तु वै सदा ॥७॥

भावनेयं च मनसि निधाय मङ्गलकारिका ।
आनन्दमाप्यतां सर्वैरिह सर्वत्र सर्वदा ।।८॥

समागतेऽस्मिन् वर्षेतु पञ्चसप्ततिवत्सरे।
प्राप्नुवन्त्वमृतं सर्वे अमृते तु महोत्सवे ।।९॥

कोरोणारहितं समृद्धिसहितं राष्ट्रं भवेद्भारतं
सर्वेषां सुखदायकं च सततं राष्ट्रं भवेद्भारतम्।
राष्ट्रोत्थानसमुत्सुका मतिमताः सर्वे निमग्ना जनाः
स्वाभीष्टञ्च समाप्नुवन्तु सततं राष्ट्रोत्सवे चामृते ॥ ॥१०॥

# भारतराष्ट्रविकासे संस्कृतम्



डॉ.लक्ष्मीकान्तविमलः
प्राध्यापकः, संस्कृतविभागः

भारतराष्ट्रे संस्कृतं मानवानां जीवनवायौ समवेतं विद्यते। न कोऽपि जनः संस्कृतं विना जीवनयात्रां करोति। संस्कृतभाषायाम् एव वैद्यकशास्त्रम्, गणितशास्त्रम्, समाजशास्त्रम्, मनोविज्ञानम्, अर्थशास्त्रम्, योगशास्त्रम् इत्यादीनि अनेकानि विषयाणि संगुम्फितानि सन्ति । अस्माकं देशे वैदिककाले अपि स्त्री सुशिक्षिता शास्त्रमर्मज्ञा आत्मतत्त्वचिन्तका चासीत्। बृहदारण्यकोपनिषदि गार्गी, मैत्रेयी, कात्यायनीच अतिप्रसिद्धा अस्ति। मैत्रेयी आत्मविद्यायाः उपासनां कृतवती। सा याज्ञवल्क्यस्य धर्मपत्नी आसीत् । सा गृस्थजीवनं यापयित्वा परमतत्त्वस्य ज्ञाने संलग्ना आसीत्। अद्यापि देहल्यां गार्गीमहाविद्यालयः मैत्रेयीमहाविद्यालयः प्रसिद्धः । यदि नारी सुशिक्षिता भवति, शास्त्रे व्यहारे दक्षा भवति, तर्हि सन्ततिरपि सुसंस्कृता जायते एव। नार्याः शिक्षा न नवीना संकल्पना अस्ति। मनुस्मृतौ अपि नार्याः सम्मानविषये सूक्तिः विद्यते। यत्र नार्याः सम्मानं जायते तत्रैव देवता निवसति। अनेन वाक्योद्बोधनेन नारीसम्मानस्य ध्वनिरायाति ।

**'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।',**मनुस्मृतिः३.५६

पुरा पश्चिमदेशस्य विद्वांसः भारतं राष्ट्ररूपेण न स्वीकुर्वन्ति । भारतदेशः राष्ट्रम् अस्ति। अस्य प्रमाणं वेदे पुराणे सर्वत्र समुपलभ्यते।

भाषास्तरेसंस्कृतस्य महद्योगदानम् अस्ति। इदानीं हिन्दीभाषा अस्माभिः प्रयुज्यते । तत्र संस्कृतस्य शब्दः प्रमुखो वर्तते। सर्वासु भारतीयभाषासु संस्कृतं जननी इव सन्तिष्ठते । व्यावहारिके जीवने संस्कृतं प्रधानम् । सर्वत्र गृहकार्ये सामाजिककार्ये संस्कृतेः च पालने संस्कृतस्य उपयोगिता विद्यते एव ।

अस्मिन् यान्त्रिके युगे गूगल इत्यस्य प्रसारः सर्वत्र अस्ति । इयं यान्त्रिकसंस्था संस्कृतभाषायाम् अपि अनुवादस्य कार्यं प्रारब्धवती । संस्कृतस्य प्रचाराय अयम् अभिनवः प्रयोगः सर्वस्मिन् विश्वस्मिन् संस्कृतस्य ख्यातिरजायत ।

दिल्लीविश्वविद्यालये राष्ट्रम् अधिकृत्य द्विविधः पाठ्यक्रमः राष्ट्रतः संबद्धः अस्ति। भारतीय-ज्ञानपरम्परायां राष्ट्रवादः तथा च संस्कृतसाहित्ये राष्ट्रियतायाः स्वरूपम् किं विद्यते । तद्विषये शुक्लयजुर्वेदे **'आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्'** इत्यस्मिन् मन्त्रे राष्ट्रस्य उदात्तभावना नरीनृत्यति। अथर्ववेदे भूमिसूक्तौ **'माता भूमिः पुत्रः अहं पृथिव्या'** इतिमन्त्रे राष्ट्रस्य भूमिः साक्षात् माता अस्ति। इयं भूमिः माता इव अस्मान् रक्षति। विष्णुपुराणे अपि भारतराष्ट्रस्य अभ्युन्नतिः दृश्यते। तत्र स्पष्टा राष्ट्रगीतिः एव समुपलभ्यते। देवताः स्वयं मधुरं गीतं गायन्ति यत् भारतीयाः प्रजाः धन्याः सन्ति यतो हि ते पुण्यभूमौ भारते सन्तिष्ठन्ते। यथोक्तम्-

**गायन्ति देवाः किल गीतकानि**

**धन्यास्तु ते भारतभूमिभागे ॥,** विष्णुपुराणम् २.३.२४

यदा अस्माकं देशः पराधीनः आसीत् । तदा बहवः जनाः देशस्य स्वतन्त्रतायाः कृते महान् यत्नः कृतवन्तः । तत्र महात्मनः गान्धिनः महत्त्वं सर्वाधिकं विद्यते। गान्धिनम् अधिकृत्ये पराधीनकाले बहवः महाकवयः काव्यं रचितवन्तः । पण्डिता क्षमारव इति नाम्नी कवयित्री सत्याग्रहगीतां विलिख्य भारतदेशस्य महान्तम् उपकारं कृतवती। तत्र सत्याग्रहगीतायां नव विषयाः बीजभूताः सन्ति। अहिंसा, सत्यम्, अस्तेयम्, ब्रह्मचर्यम्, अपरिग्रहः, स्वदेशस्य वस्तुनि निष्ठा, निर्भीतिः, रुचिसंयमः अन्ते अन्त्यजानाम् समुद्धारः ।

**'अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ ।**

**स्वदेशवस्तुनिष्ठा च निर्भीती रुचिसंयमः ॥**

**अन्त्यजानां समुद्धारो नवैतानि व्रतानि हि ।**

**भारतोत्कर्षसिद्ध्यर्थमाश्रमस्य महात्मनः ॥',** सत्याग्रहगीता ४.३-४

पण्डितमधुराप्रसाददीक्षितः भारतविजयनाटकं लिखित्वा संस्कृतसाहित्यस्य एवं राष्ट्रस्य कृते महदुपकारं कृतवान् । तस्मिन् नाटके सप्त अङ्काः विराजन्ते। तत्र पदस्य विन्यासं अत्यन्तम् अवलोकनीयः विद्यतेतराम्। स नाटककारः लिखति। अस्मिन् स्वतन्त्रतासङ्ग्रामे अस्त्रस्य आवश्यकता नास्ति अपितु सत्याग्रहेण अहिंसाव्रतेन सङ्ग्रामो जायते।

**तत्स्वातन्त्र्यमिदं रणान्न कलये स्यात् किन्त्वहिंसाव्रतात् ।**

- भारतविजयनाटकम् ५१८.

पण्डितचारुदेवशास्त्रिणा गाँधिचरितम् नामकं गद्यकाव्यं विरचितम् अस्ति । इदं गद्यकाव्यं गाँधिनम् अधिकृत्य प्रथमं गद्यकाव्यम् अस्ति । प्रकाशितेषु गाँधिकाव्येषु आद्यतमं विद्यते । अत्रापि देशस्य स्वतन्त्रतासङ्ग्रामे महात्मनः गाँधिनः कियत् योगदानम् आसीत् इत्यस्मिन् विषये प्रभूता चर्चा विद्यते।

मानवजीवने संस्कारस्य प्राधान्यम् अस्ति। संस्कृतविद्यातः अयं संस्कारबोधः शीघ्रं समायाति। मानवजीवने प्रत्येकं अपि कार्यं संस्कृतविद्यामाध्यमेन प्रचलति। इदानीम् अस्माकं राष्ट्रे मदिरापानस्य व्यवहारः अधिकः बलबान् अस्ति। धूम्रपानस्य, मादकपदार्थस्य सेवनं छात्राः कुर्वन्ति। यदि संस्कृतविद्या पठ्येत तर्हि अनेन दोषेण सुरक्षा भवति ।

वृक्षपूजा इदानीं पर्यावरणदृष्ट्या प्रचलति । वृक्षस्य जलेन सेचनं, वृक्षस्य कर्तनं न करणीयम्, वृक्षात् एव वयं प्राणवायुं स्वीकुर्मः। अतः वृक्षस्य महत्त्व अस्ति। राष्ट्रहिताय मानवहिताय वृक्षस्य प्रमुखता अस्ति।

आधुनिकशास्त्रदृष्टिरपि संस्कृतविद्यायां विद्यते। संपूर्णे विश्वस्मिन् आयुर्वेदस्य ओषध्यः उपयोगः प्रचलितः। आयुर्वेदे साक्षात् पादपात् लतातः पादपस्य मूलतः पत्रतः ओषधी जायते । एकाया ओषध्यः सेवनेन अन्यः रोगो नैव जायते। आधुनिकचिकित्सापद्धतौ एकायाः ओषध्यः सेवनेन अन्यः रोगो जायते एव।

मनोविज्ञानंपतञ्जलेर्योगदर्शने अस्माभिः दृश्यते। मनः चञ्चलम् अस्ति । अस्य मनसः चाञ्चल्यं येन विधिना दूरीभवति तस्य उपायः योगदर्शने समुपलभ्यते । भगवता श्रीकृष्णेन गीतायाम् उक्तम्-

**'चञ्चलं हि मनः कृष्ण! ।',** गीता ६.३४

आधुनिके समये समेषां युववर्गाणां मनः चञ्चलम् अस्ति। विश्वविद्यालये अन्यत्र अपि मनोविज्ञानस्य पाठः परिचलति । केन साधनेन उपयेन वा मनः शान्तं स्यात्। शान्ते मनसि विद्यायाः सञ्चारः सञ्जायते ।

कौटिल्यस्य अर्थशास्त्रं निखिलेऽपि विश्वस्मिन् मुद्राव्यवस्थायाः प्रमुखं पुस्तकं विद्यते । पुरा काले भारतवर्षे करव्यस्था कीदृशी आसीत् । राज्ञः व्यवहारस्य राष्ट्रहितस्य च तद्ग्रन्थे सर्वत्र चर्चा दरीदृश्यते।

अस्माकं भारतदेशे धर्मशास्त्रं हि सामाजिकसिद्धान्तः अस्ति। अस्मिन्नेव विषये बहवः ग्रन्थाः समुपलभ्यन्ते। तत्र स्मृतिग्रन्थः, नीतिग्रन्थः, विदुषां विषयपरकं स्वतन्त्रालेखो दृश्यते। समाजस्य का व्यवस्था आसीत्। गृहस्थस्य को धर्मः। जीवनयापनस्य का व्यवस्था आसीत् इत्यादयः विषयाः दृश्यन्ते।

संगीतस्य महत्त्वं संस्कृते विद्यते। वेदपाठस्य विभिन्नाः विधयः सन्ति। क्वचित् घनपाठः क्वचित् जटापाठः क्वचित् मालापाठः इत्यादयः। अनेन पाठेन अस्माकं देशे स्वरः एवं च वेदः सुरक्षितो विद्यते । लौकिके काव्ये सुन्दरे सुन्दरे छन्दसि गेयानि गीतानि सन्ति ।

संस्कृते कलायाः विकासः अस्ति। वैदिकयज्ञे कलायाः पूर्णः विकासः अस्ति। यदा यज्ञार्थं कुण्डस्य निर्माणं जायते। तदा कलायाः स्फुटं दर्शनं सञ्जायते । यज्ञीयपात्रे अपि कलायाः सुन्दरं दृष्टान्तं विद्यते । अस्माकं देशे मूर्तिकला, चित्रकला, वास्तुकला हस्तकला अस्ति । समग्र्यां सृष्टौ कलायाः प्रदर्शनं जायते। वयम् अपि तां कलां अनुसृत्य लोकरञ्जनाय नवीनां रचनां कुर्मः। अस्माकं देशस्य नारी चित्रांकणे सफला एवं जन्मना तत्कलायां निपुणा भवति । यद्यपि प्राचीनकाले स्त्रीणां कृते विद्यालयी शिक्षा नासीत् परन्तु व्यावहारिकीं शिक्षा आसीत्। स्वगृहे सा सुशिक्षिता भवति स्म । तृणम् आदाय पात्रं, अश्वः गजः ताभिः स्त्रीभिः कृतो विद्यते ।

समराङ्गणे अपि नारी पटुरासीत् । स्वतन्त्रतान्दोलने स्वराष्ट्रनिर्माणे नारीणां योगदानं प्रमुखम् आसीत्। झांसीनगरस्य साम्राज्ञी लक्ष्मीबाई स्वदेशरक्षायै स्वात्मानं समर्पितवती। चित्तौरनगरस्य नारी स्वदेशरक्षायै महद्युद्धं चकार । सर्वत्र नारी स्वस्थानं निर्धारयति ।

संस्कृतग्रन्थस्य लेखने नारीणां संख्या अधिका अस्ति । पण्डिताक्षमारावः नारी भूत्वा सुललिततमं काव्यं लिखितवती । वर्तमानसमये डॉ. पुष्पा दीक्षित संस्कृतकाव्यं लिखित्वा सुरभारत्याः समाराधने तत्परा अस्ति ।

